लतिका, स्त्री, (लत घाते + "क्षतिभिदिलतिभ्यः कित्।" उणा० ३। १४७। इति तिकन्।) गोधा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

लप, ऋ भावे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अलीलपत् अललापत्। भाषः कथनम्। इति दुर्गादासः॥

लपनं, क्ली, (लप्यतेऽनेनेति। लप् + करणे ल्युट्।) मुखम्। इत्यमरः॥ (भावे ल्युट्।) भाषणम्। इति लपधात्वर्थदर्शनात्॥ (यथा, आर्य्यासप्तशत्याम्। ३८१।

"प्रकटयति रागमधिकं लपनमिदं वक्रिमाणमावहति।
शोषयति च प्रतिपदं दूति शुकस्येव दयितस्य॥"

"शुकस्येव दयितस्य लपनं सम्भाषणम्। पक्षे वदनम्।" इति तट्टीका॥)

लपितं, क्ली, (लप् + क्तः भावे।) वचनम्। कथिते, त्रि। इत्यमरः॥ (लपितमस्यास्तीति। अच्। वचनयुक्ते च त्रि। यथा, अथर्व्ववेदे। ४।३६।६।

"ये मा क्रोधयन्ति लपिता हस्तिनं मशका इव।
तानहं मन्ये दुर्हितां जने अल्पशयूनिव॥")

लप्सिका, स्त्री, खाद्यविशेषः। लपसी। इति ख्याता। यथा,—

"समितां सर्पिषा भृष्टां शर्करां पयसि क्षिपेत्।
तस्मिन् घनीकृते न्यस्येत् लवङ्गमरिचादिकम्।
सिद्धैषा लप्सिका ख्याता गुणानस्या वदाम्यहम्॥
लप्सिका बृंहणी वृष्या बल्या पित्तानिलापहा।
स्निग्धा श्लेष्मकरी गुर्व्वी रोचनी तर्पणी परम्॥"

इति भावप्रकाशः॥

लब, इ ङ संसने। शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अवलम्बने सक०-शब्दे अक०-सेट्।) इ, लम्ब्यते। ङ, लम्बते। संसनमिहावलम्बनमिति गोविन्दभट्टः। ननाद चरमायुधस्तदपि मौनमालम्बसे। इति दुर्गादासः॥

लब्धः, त्रि, (लभ् + क्तः।) प्राप्तः। इत्यमरः॥ (यथा, हितोपदेशे।

"अलब्धञ्चैव लिप्सेत लब्धं रक्षेदपचयात्।
रक्षितं वर्द्धयेत् सम्यक् वृद्धं तीर्थेषु निक्षिपेत्॥")

लब्धवर्णः, पुं, (लब्धावर्णा यशांसि येन।) पण्डितः। इत्यमरः॥ (यथा, रघुः। ११। २।

"कृच्छ्रलब्धमपि लब्धवर्णभाक्
तं दिदेश मुनये सलक्ष्मणम्॥")

लब्धा, स्त्री, (लभ् + क्तः। टाप्।) नायिकाभेदः। यथा,—

"खण्डितोत्कण्ठिता लब्धा तथा प्रोषितभर्त्तृका।
कलहान्तरिता वाससज्जा स्वाधीनभर्त्तृका॥"

इति जटाधरः॥

लभ, इ ङ शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) इ, लम्भ्यते। ङ, लभते। इति दुर्गादासः॥

लभ, डु ओ ङ ष प्राप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-अनिट्।) डु, लब्धिमम्। ओ, लब्धा। ङ, लभते। ष, लभा। लभन्ति पुनरुत्थानमिति गणकृतानित्यत्वादिति रमानाथः। वस्तुतस्तु लभते लभः पचादित्वादन् ततो लभ इवाचरतीति क्वौ साध्यम्। इति दुर्गादासः॥

लभसः, पुं, (लभ् + "अत्यविचमीति।" उणा० ३। ११७। इति असच्।) वाजिबन्धनरज्जुः। इत्युणादिकोषः॥ धनम्। याचकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

लभ्यं, त्रि, (लभ्यते इति। लभ् + "पोरदुपधात्।" ३। १। ९८। इति यत्।) न्याय्यम्। इत्यमरः॥ लब्धव्यम्। इति मेदिनी। ये, ४३॥ (यथा, मुण्डकोपनिषदि। ३। २। ३।

"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुधा श्रुतेन।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥")

लमकः, पुं, (रमते इति। रम् + "रमेरश्च लो वा।" उणा० २। ३३। इति क्वुन् रस्य लत्वञ्च।) विड्गः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (तीर्थशोधकः। इत्युज्ज्वलः॥ विलासिनि, त्रि। इति केचित्॥)

लम्पटः, पुं, विड्गः। इति लम्पाकशब्दार्थे मेदिनी। के, १४९॥ (यथा, कथासरित्सागरे। ४७। १०१।

"अथेतरान्नवीत्सेव यद्यपि स्त्रीषु लम्पटः।
तथापि न स दुःखेऽस्मिन्नीदृशः स्यात्तथाविधः॥")

आसक्तः। यथा,—

"यदैहिकामुष्मिककामलम्पटः
सुतेषु दारेषु धनेषु चिन्तयन्।
शङ्केत विद्वान् कुकलेवरात्ययाद्-
यस्तस्य यत्नः श्रम एव केवलम्॥"

इति श्रीभागवते ५ स्कन्धे १९ अध्यायः॥

लम्पाकः, पुं, लम्पटः। देशभेदः। इति मेदिनी। के, १४९॥ (यथा, मार्कण्डेये। ५७। ४०।

"लम्पाकाः शूलकाराश्च चुलिका जागुडैः सह।
औपधाश्चानिभद्राश्च किरातानाञ्च जातयः॥")

लम्पाटहः, पुं, पटहवाद्यम्। इति हारावली॥

लम्फः, पुं, प्लुतगतिः। लाफ इति भाषा। इति प्रसिद्धः॥ उल्लम्फनं प्रलम्फनञ्च॥

लम्बः, पुं, (लम्बते इति। लबि अवसंसने + अच्।) नर्त्तकः। अङ्गम्। कान्तः। इति संक्षिप्तसारोणादिवृत्तिः॥ उत्कोचः। यथा,

"प्राभृतं ढौकनं लम्बोत्कोचः कौशलिकामिषे।
उपाचारः प्रदानञ्च हारो ग्राह्यायने अपि॥"

इति हेमचन्द्रः॥

अश्वभेदः। यथा,—

"चरलम्बगमा भेदाः नाटकोऽवादिचालने॥"

इति शब्दमाला॥

क्षेत्रादौ लम्बमानरेखा सूत्रं वा। यथा,—

"त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भुवाहृतो लब्ध्या।
द्विस्था भूरूनयुता दलिताबाधे तयोः स्याताम्॥
स्वाबाधाभुजकृत्योरन्तरमूलं प्रजायते लम्बः।
लम्बगुणं भूम्यर्द्धं स्पष्टं त्रिभुजे फलं भवति॥"

उदाहरणम्।

"क्षेत्रे मही मनुमिता त्रिभुजे भुजौ तु
यत्र त्रयोदशतिथिप्रमितौ हि यस्य।
तत्रावलम्बकमथो कथयावबाधे
क्षिप्रं तथा च समकोष्ठमितिं फलाख्याम्॥"

न्यासः। भूः १४ भुजौ १३। १५ लब्धे आबाधे ५। ९। लब्धो लम्बश्च १२ क्षेत्रफलञ्च ८४। इति लीलावती॥ (दैत्यविशेषः। यथा, हरिवंशे। ४३। २२।

"लम्बस्तु लम्बमेघाभः प्रलम्बाम्बरभूषणः।
दैत्यव्यूहगतो भाति सनीहार इवांशुमान्॥")

त्रि, दीर्घः। लम्बा इति भाषा। यथा,—

"दूरतः शोभते मूर्खो लम्बशाटपटावृतः।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते॥"

इति चाणक्यशतकम्॥

(लम्बमानः। यथा, रघुः। ६। ६०।

"पाण्ड्योऽयमंसार्पितलम्बहारः
कॢप्ताङ्गरागो हरिचन्दनेन।
आभाति बालातपरक्तसानुः
सनिर्झरोद्गार इवाद्रिराजः॥")

लम्बकर्णः, पुं, (लम्बौ कर्णौ यस्य।) छागः। अङ्कोटवृक्षः। इति मेदिनी। णे, १०७॥ राक्षसः। हस्ती। इति शब्दरत्नावली॥ श्येनपक्षी। इति राजनिर्घण्टः॥ (शशः। तद्यथा, अथ विलेशयेषु तत्र शशः स्यात्।

"लम्बकर्णः शशः शूली लोमकर्णो विलेशयः॥"

इति वैद्यकम्॥

लम्बः कर्णः इति कर्म्मधारये।) दीर्घश्रोत्रम्॥ तद्युक्ते, त्रि। (यथा, महाभारते। ९। ४६। ३४।

"लम्बोदर्य्यो लम्बकर्णास्तथा लम्बपयोधराः॥")

लम्बकेशः, पुं, (लम्बः केश इवाग्रभागो यस्य।) विष्टरः। स तु विवाहकाले वरोपवेशनार्थं सार्द्धद्वितयवामावर्त्तवलिताधोमुखा असंख्यातदर्भाः। यथा,—

"ऊर्द्ध्वकेशो भवेत् ब्रह्मा लम्बकेशस्तु विष्टरः।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः॥"

इति संस्कारतत्त्वम्॥

केशोऽत्राग्रम्। इति प्रायश्चित्ततत्त्वे गङ्गामाहात्म्ये प्रतिनिहितदर्भवटुस्नानप्रकरणे लिखितम्॥ * ॥ दीर्घकेशयुक्ते, त्रि॥

लम्बदन्ता, स्त्री, (लम्बा दन्ता इव फलानि यस्याः।) सैंहलीपिप्पली। इति राजनिर्घण्टः। लम्बदशनविशिष्टे, त्रि॥